द्वितीयः पाठः

# छत्तीसगढस्य लोकगीतानि

Q8DNUI



अस्माकं छत्तीसगढराज्यस्य लोकभाषासु गीतानाम् अविरलपरम्पराऽस्ति। अत्र लोकगीतेषु विविधताऽस्ति। अस्मिन् राज्ये लोकगीतानि लोकभाषायाम् अवलम्बितानि।

छत्तीसगढस्य लोकगीतेषु संस्कारगीतं धार्मिकोत्सवगीतं, ऋतुगीतादीनि च प्रचलन्ति। जनाः छत्तीसगढराज्ये संस्काराणाम् अवसरेषु अनेकानि गीतानि गायन्ति। एतेषु गीतेषु सोहरविवाहे गीते च प्रमुखे स्तः। सीमन्तसंस्कारावसरे गेयगीतं 'सधौरीगीतम्' इत्युच्यते। विवाहावसरे लोकाचाराणां परिपालनार्थं गेयगीतानां परम्परा प्रचलति। यथा प्रचलितलोकगीतेषु चूलमाटीगीतं, द्वारचारगीतं, जेवनारगीतं, भाँवरगीतं, विदागीतञ्च प्रसिद्धानि सन्ति। जनैः एतानि गीतानि छत्तीसगढलोकभाषासु गीयन्ते।



धार्मिकगीतानां विविधानि रुपाणि सन्ति। यथा शिवरामकृष्णानां विवाहगीतानि लोकप्रियाणि। भक्तिगीतेषु भजनानि प्रसिद्धानि। देव्याः जससेवागीतं प्रसिद्धम्।

ऋतुगीतेषु श्रावणभाद्रपदमासे भोजलीगीतं कार्तिकमासे शुकगीतं, गौरागीतादीनि च लोकप्रियाणि। फाल्गुने मासे च दण्डनृत्यं, फागगीतादीनि च अतीव प्रसिद्धानि।

अस्मिन् राज्ये 'फुगडी' इति लोकक्रीडा प्रसिद्धा।



इमां क्रीडां खेलन्त्यः बालिकाः 'फुगडी' इति गीतं गायन्ति।

अत्र प्रचलितं 'बांस' इति गीतं मूलतः गोपालकानां गीतमस्ति। गोचारणसंस्कृतेः अभिव्यक्तिः एतेषां गीतानां माध्यमेन प्रतीयते। 'बांस' इति एकं अद्भुतं वाद्ययन्त्रमस्ति यत् केवलं छत्तीसगढराज्ये एव प्रचलति।

राज्यस्य प्रसिद्धेषु लोकगीतेषु ददरियानृत्येन सह गेयपरम्परा विद्यते। अस्मात् कारणात् अस्मिन् राज्ये लोकगीतानां परम्परा वर्तते। अत्र अनेके लोककलाकाराः लोकगीतानां माध्यमेन प्रदेशस्य संस्कृतिं गौरवान्वितं कृतवन्तः। छत्तीसगढस्य जनजीवने लोकगीतानां वैशिष्ट्यम् एतत्। जनाः लोकगीतमाश्रित्य आनन्दमनुभवन्ति, स्वकीयं जीवनं उत्सवमयं सृजन्तीति।



## शब्दार्थाः

लोकभाषासु = लोकभाषाओं में। अविरल = अटूट/निरन्तर। परम्पराऽस्ति = परम्परा है। लोकगीतेषु = लोकगीतों में। लोकभाषायाम् = लोकभाषा में। अवलम्बितानि = आधारित है। प्रचलन्ति = प्रचलित हैं। गायन्ति = गाते हैं। गीतेषु = गीतों में। सीमन्त = सोलह संस्कार में से एक संस्कार। जेवनार गीतं = बारातियों के भोजन के समय गाया जाने वाला गीत। विद्यते = है। माध्यमेन = माध्यम से। कृतवन्तः = किये हैं। वैशिष्ट्यम् = विशिष्टता है। लोकगीतमाश्रित्यं = लोकगीतों का आश्रय लेकर। आनन्दमनुभवन्ति = आनन्द का अनुभव करते हैं। सृजन्ति = बनाते हैं।

## अभ्यासप्रश्नाः

(1) निम्नलिखित प्रश्नों के उत्तर दीजिए–

(क) छत्तीसगढराज्ये कानि कानि लोकगीतानि प्रचलितानि ?

(ख) सीमन्तसंस्कारावसरे गेयगीतं किम् उच्च्यते ?

(ग) जनाः भोजलीगीतं कस्मिन् मासे गायन्ति ?

(घ) गोपालकानां गीतं किमस्ति।

(ङ) फाल्गुनमासस्य प्रसिद्धगीतं लिखतु।

(2) रिक्त स्थानों की पूर्ति कीजिए–

(क) अस्मिन् राज्ये लोकगीतानि .................. अवलम्बितानि।

(ख) देव्याः जसगीतं ................. च प्रसिद्धे।

(ग) अस्मिन् राज्ये .................. इति लोकक्रीडा प्रसिद्धा।

(घ) स्वकीयं जीवनं ................ सृजन्तीति।

(ङ) छत्तीसगढस्य जनजीवनं ............... वैशिष्ट्यम्।

(3) उचित सम्बन्ध जोड़िए –

(क) सधौरीगीतम् – फाल्गुनमासे

(ख) भाँवरगीतम् – कार्तिकमासे

(ग) शुकगीतम् – विवाहसंस्कारे

(घ) फागगीतम् – क्रीडासमये

(ङ) फुगडी गीतम् – सीमन्तसंस्कारे

(4) संस्कृत में अनुवाद कीजिए –

(क) छत्तीसगढ़ में लोकगीतों में विविधता है।

(ख) लोकगीतों को छत्तीसगढ़ी में गाते हैं।

(ग) धार्मिक गीतों के विविध रूप हैं।

(घ) 'बांस' एक अद्भुत् वाद्ययन्त्र है।

(ङ) पण्डवानी को नृत्य के साथ गाने की परम्परा है।

(5) सन्धि विच्छेद करते हुए नाम लिखिए –

(क) धार्मिकोत्सवः (ग) विवाहावसरे

(ख) इत्युच्यते (घ) ऋतुगीतञ्च

Q8HJW6

(6) इस पाठ में प्रयुक्त "गै" धातु के रूप लट्लकार में लिखिए।

(7) इस पाठ में आए हुए इकारान्त शब्द 'संस्कृति' शब्द का रूप सभी विभक्तियों में लिखिए।

(8) पाठ में आए लोक गीतों के अतिरिक्त अवसरानुकूल गाए जाने वाले अन्य गीतों की सूची बनाइए।